# વિવેકધૈર્યાશ્રયઃ

vivekadhairyAshrayaH

sanskritdocuments.org

March 17, 2018

# vivekadhairyAshrayaH

# વિવેકધૈર્યાશ્રયઃ

## Sanskrit Document Information

Text title : vivekadhairyAshrayaH

File name : vivekadhairyAshrayaH.itx

Category : vishhnu, krishna, puShTimArgIya, vallabhaachaarya

Location : doc_vishhnu

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

vivekadhairyAshrayaH

# વિવેકધૈર્યાશ્રયઃ

વિવેકધૈર્યે સતતં રક્ષણીયે તથાશ્રયઃ ।
વિવેકસ્તુ હરિઃ સર્વં નિજેચ્છાતઃ કરિષ્યતિ ॥ ૧॥

પ્રાર્થિતે વા તતઃ કિં સ્યાત્ સ્વામ્યભિપ્રાયસંશયાત્ ।
સર્વત્ર તસ્ય સર્વં હિ સર્વસામર્થ્યમેવ ચ ॥ ૨॥

અભિમાનશ્ચ સન્ત્યાજ્યઃ સ્વામ્યધીનત્વભાવનાત્ ।
વિશેષતશ્ચેદાજ્ઞા સ્યાદન્તઃકરણગોચરઃ ॥ ૩॥

તદા વિશેષગત્યાદિ ભાવ્યં ભિન્નં તુ દૈહિકાત્ ।
આપદ્ગત્યાદિકાર્યેષુ હઠસ્ત્યાજ્યશ્ચ સર્વથા ॥ ૪॥

અનાગ્રહશ્ચ સર્વત્ર ધર્માધર્માગ્રદર્શનમ્ ।
વિવેકોઽન્યં સમાખ્યાતો ધૈર્યં તુ વિનિરૂપ્યતે ॥ ૫॥

ત્રિદુઃખસહનં ધૈર્યમામૃતેઃ સર્વતઃ સદા ।
તક્રવદ્દેહવદ્ભાવ્યં જડવદ્ગોપભાર્યવત્ ॥ ૬॥

પ્રતીકારો યદૃચ્છાતઃ સિદ્ધશ્ચેન્નાગ્રહી ભવેત્ ।
ભાર્યાદીનાં તથાન્યેષામસતશ્ચાક્રમં સહેત્ ॥ ૭॥

સ્વયમિન્દ્રિયકાર્યાણિ કાયવાઙ્મનસા ત્યજેત્ ।
અશૂરેણાપિ કર્તવ્યં સ્વસ્યાસામર્થ્યભાવનાત્ ॥ ૮॥

અશક્યે હરિરેવાસ્તિ સર્વમાશ્રયતો ભવેત્ ।
એતત્સહનમત્રોક્તમાશ્રયોઽતો નિરૂપ્યતે ॥ ૯॥

ઐહિકે પારલોકે ચ સર્વથા શરણં હરિઃ ।
દુઃખહાનૌ તથા પાપે ભયે કામાદ્યપૂરણે ॥ ૧૦॥

ભક્તદ્રોહે ભક્ત્યભાવે ભક્તૈશ્ચાતિક્રમે કૃતે ।
અશક્યે વા સુશક્યે વા સર્વથા શરણં હરિઃ ॥ ૧૧॥

અહઙ્કારકૃતે ચૈવ પોષ્યપોષણરક્ષણે ।
પોષ્યાતિક્રમણે ચૈવ તથાન્તેવાસ્યતિક્રમે ॥ ૧૨॥

અલૌકિકમનઃસિદ્ધૌ સર્વાર્થા શરણં હરિઃ ।
એવં ચિત્તે સદા ભાવ્યં વાચા ચ પરિકીર્તયેત્ ॥ ૧૩॥

અન્યસ્ય ભજનં તત્ર સ્વતો ગમનમેવ ચ ।
પ્રાર્થના કાર્યમાત્રેઽપિ તતોઽન્યત્ર વિવર્જયેત્ ॥ ૧૪॥

અવિશ્વાસો ન કર્તવ્યઃ સર્વથા બાધકસ્તુ સઃ ।
બ્રહ્માસ્ત્રચાતકૌ ભાવ્યૌ પ્રાપ્તં સેવેત નિર્મમઃ ॥ ૧૫॥

યથાકથઞ્ચિત્કાર્યાણિ કુર્યાદુચ્ચાવચાન્યપિ ।
કિં વા પ્રોક્તેન બહુના શરણં ભાવયેદ્ધરિમ્ ॥ ૧૬॥

એવમાશ્રયણં પ્રોક્તં સર્વેષાં સર્વદા હિતમ્ ।
કલૌ ભક્ત્યાદિમાર્ગા હિ દુઃસાધ્યા ઇતિ મે મતિઃ ॥ ૧૭॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતો વિવેકધૈર્યાશ્રયઃ સમાપ્તઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*vivekadhairyAshrayaH*
pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*